StudentBounty.com

Test Booklet No.
प्रश्नपत्रिका क्र.

**M**

# Paper-III
# SANSKRIT

**Signature and Name of Invigilator**

1. (Signature) ........................................

(Name) ................................................

2. (Signature) ........................................

(Name) ................................................

Seat No. [ ]

(In figures as in Admit Card)

Seat No. ..............................................................

(In words)

OMR Sheet No. [ ]

(To be filled by the Candidate)

## DEC - 04313

**Time Allowed : 2½ Hours]** **[Maximum Marks : 150**

Number of Pages in this Booklet : **16** Number of Questions in this Booklet : **75**

**Instructions for the Candidates**

1. Write your Seat No. and OMR Sheet No. in the space provided on the top of this page.
2. This paper consists of **75** objective type questions. Each question will carry *two* marks. *All* questions of Paper-III will be compulsory, covering entire syllabus (including all electives, without options).
3. At the commencement of examination, the question booklet will be given to the student. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as follows :
   (*i*) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal or open booklet.
   (*ii*) **Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to missing pages/ questions or questions repeated or not in serial order or any other discrepancy should not be accepted and correct booklet should be obtained from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given. The same may please be noted.**
   (*iii*) After this verification is over, the OMR Sheet Number should be entered on this Test Booklet.
4. Each question has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.
   **Example :** where (C) is the correct response.
   (A) (B) ● (D)
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done at the end of this booklet.
8. If you write your Name, Seat Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, you will render yourself liable to disqualification.
9. You have to return original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry the Test Booklet and duplicate copy of OMR Sheet on conclusion of examination.
10. **Use only Blue/Black Ball point pen.**
11. **Use of any calculator or log table, etc., is prohibited.**
12. **There is no negative marking for incorrect answers.**

**विद्यार्थ्यांसाठी महत्त्वाच्या सूचना**

1. परिक्षार्थींनी आपला आसन क्रमांक या पृष्ठावरील वरच्या कोपऱ्यात लिहावा. तसेच आपणांस दिलेल्या उत्तरपत्रिकेचा क्रमांक त्याखाली लिहावा.
2. सदर प्रश्नपत्रिकेत **75** बहुपर्याय प्रश्न आहेत. प्रत्येक प्रश्नास **दोन** गुण आहेत. या प्रश्नपत्रिकेतील **सर्व** प्रश्न सोडविणे अनिवार्य आहे. सदरचे प्रश्न हे या विषयाच्या संपूर्ण अभ्यासक्रमावर आधारित आहेत.
3. परीक्षा सुरू झाल्यावर विद्यार्थ्याला प्रश्नपत्रिका दिली जाईल. सुरुवातीच्या 5 मिनीटांमध्ये आपण सदर प्रश्नपत्रिका उघडून खालील बाबी अवश्य तपासून पहाव्यात.
   (*i*) प्रश्नपत्रिका उघडण्यासाठी प्रश्नपत्रिकेवर लावलेले सील उघडावे. सील नसलेली किंवा सील उघडलेली प्रश्नपत्रिका स्विकारू नये.
   (*ii*) **पहिल्या पृष्ठावर नमूद केल्याप्रमाणे प्रश्नपत्रिकेची एकूण पृष्ठे तसेच प्रश्नपत्रिकेतील एकूण प्रश्नांची संख्या पडताळून पहावी. पृष्ठे कमी असलेली/कमी प्रश्न असलेली/प्रश्नांचा चूकीचा क्रम असलेली किंवा इतर त्रुटी असलेली सदोष प्रश्नपत्रिका सुरुवातीच्या 5 मिनिटातच पर्यवेक्षकाला परत देऊन दुसरी प्रश्नपत्रिका मागवून घ्यावी. त्यानंतर प्रश्नपत्रिका बदलून मिळणार नाही तसेच वेळही वाढवून मिळणार नाही याची कृपया विद्यार्थ्यांनी नोंद घ्यावी.**
   (*iii*) वरीलप्रमाणे सर्व पडताळून पहिल्यानंतरच प्रश्नपत्रिकेवर ओ.एम.आर. उत्तरपत्रिकेचा नंबर लिहावा.
4. प्रत्येक प्रश्नासाठी (A), (B), (C) आणि (D) अशी चार विकल्प उत्तरे दिली आहेत. त्यातील योग्य उत्तराचा रकाना खाली दर्शविल्याप्रमाणे ठळकपणे काळा/निळा करावा.
   **उदा. :** जर (C) हे योग्य उत्तर असेल तर.
   (A) (B) ● (D)
5. या प्रश्नपत्रिकेतील प्रश्नांची उत्तरे **ओ.एम.आर. उत्तरपत्रिकेतच दर्शवावीत.** इतर ठिकाणी लिहीलेली उत्तरे तपासली जाणार नाहीत.
6. आत दिलेल्या सूचना काळजीपूर्वक वाचाव्यात.
7. प्रश्नपत्रिकेच्या शेवटी जोडलेल्या को-या पानावरच कच्चे काम करावे.
8. जर आपण ओ.एम.आर. वर नमूद केलेल्या ठिकाणा व्यतिरिक्त इतर कोठेही नाव, आसन क्रमांक, फोन नंबर किंवा ओळख पटेल अशी कोणतीही खूण केलेली आढळून आल्यास अथवा असभ्य भाषेचा वापर किंवा इतर गैरमार्गाचा अवलंब केल्यास विद्यार्थ्याला परीक्षेस अपात्र ठरविण्यात येईल.
9. परीक्षा संपल्यानंतर विद्यार्थ्याने मूळ ओ.एम.आर. उत्तरपत्रिका पर्यवेक्षकांकडे परत करणे आवश्यक आहे. तथापी, प्रश्नपत्रिका व ओ.एम.आर. उत्तरपत्रिकेची द्वितीय प्रत आपल्याबरोबर नेण्यास विद्यार्थ्यांना परवानगी आहे.
10. **फक्त निळ्या किंवा काळ्या बॉल पेनचाच वापर करावा.**
11. **कॅलक्युलेटर किंवा लॉग टेबल वापरण्यास परवानगी नाही.**
12. **चुकीच्या उत्तरासाठी गुण कपात केली जाणार नाही.**

www.StudentBounty.com

StudentBounty.com



www.StudentBounty.com

StudentBounty.com

DEC-04313/III

# Sanskrit
## Paper III
# संस्कृत
## प्रश्नपत्रिका III

**Time Allowed : 2½ Hours]** **[Maximum Marks : 150**

**Note :** This paper contains **75** multiple choice questions, each carrying **Two (2)** marks. Attempt *All* questions.

**सूचना :** या प्रश्नपत्रिकेमध्ये एकूण **75** बहुपर्यायी प्रश्न दिलेले असून प्रत्येक प्रश्नाला **दोन (2)** गुण आहेत. **सर्व** प्रश्न सोडवा.

1. 'न यं दिप्सन्ति दिप्सव' इति मन्त्रांशः कमभिप्रेत्य पठितः ?
   (A) इन्द्रम्
   (B) वरुणम्
   (C) यमम्
   (D) धर्मराजम्

2. सामवेदजैमिनीयशाखायाः नामान्तरं किम् ?
   (A) राणायणीयशाखा
   (B) जाजलशाखा
   (C) तलवकारशाखा
   (D) माध्यन्दिनशाखा

3. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत –
   (*a*) ज्योतिःशास्त्रमनुसृत्य बालगङ्गाधरतिलकेन ऋग्वेदस्य कालः निर्णीतः।
   (*b*) महीधरः चतुर्वेदभाष्यकर्ता।
   (*c*) भूमिसूक्तं ऋग्वेदेऽन्तर्भवति।
   (*d*) एकविंशतिधा आयर्वणो वेदः इति भाष्यकार–मतम्।
   (A) असत्यम्, सत्यम्, सत्यम्, असत्यम्
   (B) सत्यम्, असत्यम्, असत्यम्, असत्यम्
   (C) सत्यम्, सत्यम्, असत्यम्, सत्यम्
   (D) असत्यम्, असत्यम्, सत्यम्, सत्यम्



www.StudentBounty.com

StudentBounty.com



4. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत—

| | | | |
|---|---|---|---|
| (*a*) | उवटः | (*p*) | श्रौतसूत्रम् |
| (*b*) | पुराकल्पः | (*q*) | शिक्षा |
| (*c*) | वाधूलः | (*r*) | यजुर्वेदः |
| (*d*) | लोमशी | (*s*) | ब्राह्मणम् |

(A) *aq*, *bp*, *cr*, *ds*

(B) *as*, *br*, *cs*, *dq*

(C) *ap*, *bs*, *cr*, *dp*

(D) *ar*, *bs*, *cp*, *dq*

5. अधस्तनेषु विरूपं विचिनुत –

(A) उपनयनम्

(B) स्वाध्यायः

(C) भूतयज्ञः

(D) पितृयज्ञः

6. फुल्लसूत्रं कस्य वेदस्य प्रातिशाख्यं भवति ?

(A) ऋग्वेदस्य

(B) अथर्ववेदस्य

(C) यजुर्वेदस्य

(D) सामवेदस्य

7. 'इन्द्रियनित्यं वचनम्' इति कस्य मतमिदम् ?

(A) औदुम्बरायणस्य

(B) कौत्सस्य

(C) यास्कस्य

(D) शाकटायनस्य

8. अधस्तनेषु युग्मपर्यायेषु समीचीनं विचिनुत –

| | | | |
|---|---|---|---|
| (*a*) | विश्वचक्षसे | (*p*) | सप्तम्येकवचनम् |
| (*b*) | दध्मसि | (*q*) | उत्तमपुरुषबहुवचनम् |
| (*c*) | रोदसी | (*r*) | अव्ययम् |
| (*d*) | अहन् | (*s*) | प्रथमाद्विवचनम् |

(A) *ap*, *bq*, *cr*, *ds*

(B) *ar*, *bq*, *cp*, *ds*

(C) *ar*, *bq*, *cs*, *dp*

(D) *aq*, *bp*, *cr*, *ds*

9. अधस्तनेषु विरूपं विचिनुत –

(A) सायणः

(B) उवटः

(C) वेङ्कटमाधवः

(D) पतञ्जलिः



www.StudentBounty.com

StudentBounty.com



10. अधस्तनेषु युग्मपर्यायेषु समीचीनं विचिनुत –

| | | | |
|---|---|---|---|
| (*a*) | संहिता | (*p*) | विशयवत्य: |
| (*b*) | आख्यातम् | (*q*) | पर: सन्निकर्ष: |
| (*c*) | वृत्तय: | (*r*) | ह्वियत आयम्यमानम् |
| (*d*) | हिरण्यम् | (*s*) | भावप्रधानम् |

(A) *ar*, *bq*, *cp*, *ds*

(B) *as*, *br*, *cq*, *dp*

(C) *ap*, *bs*, *cq*, *dr*

(D) *aq*, *bs*, *cp*, *dr*

11. 'यदपूर्वं यक्षमन्त: प्रजानाम्' इति मन्त्रांश: कस्मिन् सूक्ते अन्तर्भवति ?

(A) पर्जन्यसूक्ते

(B) वरुणसूक्ते

(C) शिवसङ्कल्पसूक्ते

(D) इन्द्रसूक्ते

12. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत –

(*a*) 'क्' इति घोषवर्ण:।

(*b*) 'ऐ' इति सन्ध्यक्षरम्।

(*c*) 'घ्' इति सोष्मवर्ण:।

(*d*) 'उपो' इति प्रगृह्य:।

(A) सत्यम्, असत्यम्, सत्यम्, असत्यम्

(B) असत्यम्, सत्यम्, सत्यम्, सत्यम्

(C) असत्यम्, असत्यम्, सत्यम्, सत्यम्

(D) सत्यम्, असत्यम्, असत्यम्, सत्यम्

13. अधस्तनेषु प्रगृह्यं विचिनुत –

(A) विश्ववारे

(B) ईरयन्ती

(C) विष्णो

(D) दधिरे

14. अधस्तनेषु युग्मपर्यायेषु समीचीनं विचिनुत –

| | | | |
|---|---|---|---|
| (*a*) | अध्वर्यु: | (*p*) | अग्निष्टोम: |
| (*b*) | द्वादश सामानि | (*q*) | गृह्याग्नि: |
| (*c*) | औपासनाग्नि: | (*r*) | यजुर्वेद: |
| (*d*) | होता | (*s*) | ऋग्वेद: |

(A) *ar*, *bp*, *cq*, *ds*

(B) *ap*, *bq*, *cr*, *ds*

(C) *aq*, *bp*, *cr*, *ds*

(D) *as*, *bq*, *cp*, *dr*



www.StudentBounty.com

StudentBounty.com



15. अधस्तनेषु विरूपं विचिनुत –

(A) ज्योतिष्टोमेन यजेत स्वर्गकामः।

(B) दध्ना जुहोति।

(C) उद्भिदा यजेत पशुकामः।

(D) आदित्यो यूपः।

16. 'घनश्यामः' इति समासः केन सूत्रेण भवति ?

(A) उपमानानि सामान्यवचनैः।

(B) विशेषणं विशेष्येण बहुलम्।

(C) उपमितं व्याघ्रादिभिः सामान्याप्रयोगे।

(D) तत्पुरुषः समानाधिकरणः कर्मधारयः।

17. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

| | | | |
|---|---|---|---|
| (*a*) | भीत्रार्थानां भयहेतुः। | (*p*) | नदीसंज्ञा |
| (*b*) | अजाद्यतष्टाप्। | (*q*) | आत्मनेपदविधायकसूत्रम् |
| (*c*) | यूस्त्र्याख्यौ नदी। | (*r*) | स्त्रीप्रत्ययः |
| (*d*) | समवप्रविभ्यः स्थः। | (*s*) | अपादानसंज्ञा |

(A) *aq*, *bs*, *cp*, *dr*

(B) *ar*, *bq*, *cs*, *dp*

(C) *as*, *br*, *cp*, *dq*

(D) *ap*, *bs*, *cq*, *dr*

18. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत –

(*a*) शब्दार्थयोः सम्बन्धः अनित्यः।

(*b*) पदे वर्णा न विद्यन्ते इति भर्तृहरेः अभिप्रायः।

(*c*) लक्ष्यलक्षणे व्याकरणम्।

(*d*) 'सुदेवो असि वरुण' इति व्याकरणस्य गौणं प्रयोजनम्।

(A) असत्यम्, सत्यम्, सत्यम्, सत्यम्

(B) सत्यम्, असत्यम्, सत्यम्, असत्यम्

(C) असत्यम्, सत्यम्, असत्यम्, सत्यम्

(D) सत्यम्, असत्यम्, असत्यम्, सत्यम्

19. अधस्तनेषु विरूपं विचिनुत –

(A) समासप्रकरणम्

(B) ब्रह्मकाण्डम्

(C) स्त्रीप्रत्ययाः

(D) आत्मनेपदप्रक्रिया

20. द्विगुसमासविधायकं सूत्रं किं वर्तते ?

(A) द्विगुरेकवचनम्।

(B) द्विगुश्च।

(C) सङ्ख्यापूर्वो द्विगुः।

(D) स नपुंसकम्।



www.StudentBounty.com

StudentBounty.com



21. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत –

(*a*) 'कुम्भकार:' इति उपपदतत्पुरुष: समास:।

(*b*) टच् इति समासान्तप्रत्यय: तद्धिताधिकारे वर्तते।

(*c*) 'त्रिमुनिव्याकरणम्' इत्यत्र द्विगुसमासो वर्तते।

(*d*) रूपवद्भार्य: इत्यस्य समासस्य विग्रह: 'रूपवती भार्या यस्या:' इति भवति।

(A) असत्यम्, सत्यम्, असत्यम्, सत्यम्

(B) सत्यम्, सत्यम्, असत्यम्, सत्यम्

(C) सत्यम्, असत्यम्, सत्यम्, असत्यम्

(D) असत्यम्, असत्यम्, सत्यम्, सत्यम्

22. अधस्तनवर्गयो: युग्मपर्यायेषु समीचीनं विचिनुत –

| | |
|---|---|
| (*a*) अपृक्त:। | (*p*) न ङीष् प्रत्यय:। |
| (*b*) नखमुखात्संज्ञायाम्। | (*q*) मत्वर्थीयप्रत्यय:। |
| (*c*) अचो यत्। | (*r*) एकाल् प्रत्यय:। |
| (*d*) अस्मायामेधास्रजो विनि:। | (*s*) कृत्यप्रत्यय:। |

(A) *ap*, *br*, *cq*, *ds*

(B) *aq*, *bs*, *cp*, *dr*

(C) *as*, *bq*, *cr*, *dp*

(D) *ar*, *bp*, *cs*, *dq*

23. विरूपं विचिनुत –

(A) क्यप्

(B) यत्

(C) तव्यत्

(D) स्य:

24. अधस्तनवर्गयो: युग्मपर्यायेषु समीचीनं पर्यायं विचिनुत –

| | |
|---|---|
| (*a*) क्ङिति च। | (*p*) पतञ्जलि: |
| (*b*) नित्या: शब्दार्थसम्बन्धा:। | (*q*) पाणिनि: |
| (*c*) तस्माद् ध्वनि: शब्द:। | (*r*) गुणवृद्धिनिषेध: |
| (*d*) अजर्यं सङ्गतम्। | (*s*) भर्तृहरि: |

(A) *as*, *br*, *cq*, *dp*

(B) *aq*, *bp*, *cr*, *ds*

(C) *ap*, *bq*, *cs*, *dr*

(D) *ar*, *bs*, *cp*, *dq*

25. वर्णानां विभाग: कतिधा स्मृत: ?

(A) सप्तधा

(B) षोढा

(C) पञ्चधा

(D) त्रिधा



www.StudentBounty.com

StudentBounty.com



26. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं पर्यायं विचिनुत –

| | |
|---|---|
| (*a*) रक्षोहागमलध्वसंदेहाः | (*p*) शब्दः |
| (*b*) प्रतीतपदार्थको ध्वनिः | (*q*) व्याकरणप्रयोजनानि |
| (*c*) शब्दानां प्रतिपदपाठः | (*r*) बहवोऽपशब्दाः |
| (*d*) एकैकस्य शब्दस्य | (*s*) व्याकरणाध्ययनस्य प्राचीना पद्धतिः। |

(A) *ar*, *bq*, *cp*, *ds*

(B) *aq*, *bp*, *cs*, *dr*

(C) *as*, *br*, *cq*, *dp*

(D) *aq*, *bp*, *cr*, *ds*

27. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं पर्यायं विचिनुत –

(*a*) बर्मीभाषा सिनोतिबेटन् भाषाकुले अन्तर्भवति।

(*b*) कन्नडभाषा भारोपीय भाषाकुलेऽन्तर्भवति।

(*c*) मुण्डाभाषा द्राविडीभाषाकुलेऽन्तर्भवति।

(*d*) फ्रेंचभाषा फिनोउग्रिकभाषाकुले समाविष्टा वर्तते।

(A) सत्यम्, असत्यम्, सत्यम्, असत्यम्

(B) सत्यम्, असत्यम्, असत्यम्, असत्यम्

(C) असत्यम्, असत्यम्, सत्यम्, सत्यम्

(D) असत्यम्, सत्यम्, सत्यम्, सत्यम्

28. अधस्तनेषु विरूपं विचिनुत –

(A) हिटाइटभाषा

(B) वैदिकभाषा

(C) फ्रेंचभाषा

(D) हिब्रूभाषा

29. अधस्तनेषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत –

(*a*) लेखनमेव भाषायाः प्रथमोऽविष्कारः।

(*b*) मानवानां भाषा जैविकी एव।
(biological)

(*c*) उच्चारणमेव मुखावयवानां प्रथमं कार्यम्।

(*d*) कण्ठबिलसङ्कोचतः विवृतः वर्ण उत्पद्यते।

(A) असत्यम्, असत्यम्, असत्यम्, असत्यम्

(B) सत्यम्, असत्यम्, सत्यम्, सत्यम्

(C) असत्यम्, सत्यम्, असत्यम्, सत्यम्

(D) सत्यम्, सत्यम्, सत्यम्, सत्यम्



www.StudentBounty.com

StudentBounty.com



30. अधस्तनेषु युग्मपर्यायेषु समीचीनं विचिनुत –

| | | | |
|---|---|---|---|
| (*a*) | ग्रीम | (*p*) | रचनात्मकं भाषाशास्त्रम् (Structural Linguistics) |
| (*b*) | लिओनार्ड ब्लूमफील्ड | (*q*) | प > फ |
| (*c*) | चॉम्स्की | (*r*) | निष्पादकं भाषाशास्त्रम् (Generative Linguistics) |
| (*d*) | फेर्दिनान्द दी सोस्यूर | (*s*) | वर्णनात्मकं भाषाविज्ञानं |

(A) *ap*, *bq*, *cr*, *ds*

(B) *aq*, *bp*, *cr*, *ds*

(C) *ar*, *bs*, *cq*, *dp*

(D) *as*, *bq*, *cp*, *dr*

31. अधस्तनेषु पर्यायेषु समीचीनं विचिनुत – ''तेषामप्येकदेशत्वे पिण्डः स्यादणुकमात्रकः'' एतदुक्त्या निषिध्यते।

(A) परमाणूनां निरवयवत्वम्।

(B) अणूनां बहुत्वम्।

(C) परमाणूनामस्तित्वम्।

(D) अणूनामस्तित्वाभावः।

32. ''सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजित.........'' इति अर्हत्स्वरूपमुक्तम्।

(A) प्रमेयकमलमार्तण्डे।

(B) तत्त्वार्थसूत्रे।

(C) आप्तनिश्चयालङ्कारे।

(D) वीतरागस्तुत्याम्।

33. योगभाष्यटीकाकारेषु प्राचीनतमोऽस्ति –

(A) शंकरः।

(B) विज्ञानभिक्षुः।

(C) वाचस्पतिः।

(D) हरिहरानन्दारण्यः।

34. अधस्तनेषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत –

(*a*) प्रमाणत्रयं सांख्यैः स्वीकृतम्।

(*b*) प्रमाणचतुष्टयं सांख्यसम्मतम्।

(*c*) कार्यं सत्।

(*d*) बुद्धीन्द्रियाणि षट्।

(A) सत्यम्, असत्यम्, सत्यम्, असत्यम्

(B) असत्यम्, सत्यम्, असत्यम्, सत्यम्

(C) सत्यम्, असत्यम्, असत्यम्, सत्यम्

(D) सत्यम्, सत्यम्, सत्यम्, सत्यम्



www.StudentBounty.com

StudentBounty.com



35. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) विज्ञानमात्रं क्षणिकमित्येके। (*p*) योगाचारबौद्धाः।

(*b*) शून्यमित्यपरे। (*q*) नैयायिकाः।

(*c*) अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे। (*r*) माध्यमिकबौद्धाः।

(*d*) भोक्तैव केवलं न कर्तेत्येके। (*s*) सांख्याः।

(A) *ap*, *br*, *cq*, *ds*

(B) *ar*, *bp*, *cs*, *dq*

(C) *aq*, *br*, *cp*, *cs*

(D) *ds*, *dq*, *dr*, *dp*

36. अधस्तनेषु पर्यायेषु समीचीनं विचिनुत – कति द्रव्याणि ?

(A) पञ्च

(B) सप्त

(C) नव

(D) एकादश

37. अधस्तनेषु पर्यायेषु समीचीनं विचिनुत – वेदान्तसारे अज्ञानस्य शक्तिसङ्ख्या का ?

(A) त्रीणि।

(B) सप्त।

(C) पञ्च।

(D) द्वे।

38. पक्षत्वं नाम किम् ?

(A) सिषाधयिषाविशिष्टसिद्ध्यभावः।

(B) सिषाधयिषासहितसिद्ध्यभावः।

(C) सिषाधयिषाविरहविशिष्टसिद्ध्यभावः।

(D) सिषाधयिषाभावः।

39. अधस्तनेषु युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) प्रधानविधिः। (*p*) दध्ना जुहोति

(*b*) विशिष्टविधिः। (*q*) यजेत स्वर्गकामः

(*c*) गुणविधिः। (*r*) अग्निहोत्रं जुहुयात्

(*d*) अधिकारविधिः। (*s*) सोमेन यजेत

(A) *ar*, *bp*, *cs*, *dq*

(B) *ar*, *bs*, *cp*, *dq*

(C) *ap*, *bq*, *cr*, *ds*

(D) *as*, *br*, *cp*, *dq*

40. अधस्तनेषु वाक्येषु असमीचीनं विचिनुत –

(A) आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा।

(B) विपक्षस्तु सन्दिग्धसाध्यधर्मः।

(C) साध्यविपर्ययव्याप्तेस्तु विरुद्धः।

(D) यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्।



www.StudentBounty.com

StudentBounty.com



41. अधस्तनेषु पर्यायेषु समीचीनं विचिनुत – बाह्यार्थशून्यत्वं के प्रतिपादयन्ति ?
   (A) योगाचाराः
   (B) माध्यमिकाः
   (C) सौत्रान्तिकाः
   (D) वैभाषिकाः

42. सम्प्रज्ञातसमाधेः किं लक्षणमस्ति ?
   (A) चित्तस्यावृत्तिकस्य प्रशान्तवाहिता स्थितिः।
   (B) वितर्कविचारानन्दास्मितारूपानुगमात्।
   (C) कौष्ठ्यस्य बायोर्नासिकपुटाभ्यां प्रयत्न-विशेषाद्वमनम्।
   (D) सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधो चित्तस्य।

43. पुरुषः कीदृशः ?
   (A) प्रकृतिसदृशः।
   (B) विकृतिसदृशः।
   (C) प्रकृतिविकृतिसदृशः।
   (D) न प्रकृतिविकृतिसदृशः।

44. ''ब्रह्मजिज्ञासा'' इत्यत्र कः समासः ?
   (A) द्वितीयातत्पुरुषः।
   (B) षष्ठीतत्पुरुषः।
   (C) पञ्चमीतत्पुरुषः।
   (D) कर्मधारयः।

45. रसत्वेऽतिव्याप्तिवारणाय किं पदं प्रयुक्तम् ?
   (A) कर्म इति
   (B) द्रव्यम् इति
   (C) समवाय इति
   (D) गुण इति

46. रामायणस्य मुख्यः रसः कः ?
   (A) वीरः
   (B) शान्तः
   (C) करुणः
   (D) अद्भुतः

47. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत –
   (*a*) रामायणीया कथा महाभारते न प्राप्यते।
   (*b*) रामायणीया कथा महाभारते प्राप्यते।
   (*c*) महाभारतकथा रामायणे न प्राप्यते।
   (*d*) महाभारतकथा रामायणे प्राप्यते।
   (A) सत्यम्, असत्यम्, असत्यम्, सत्यम्
   (B) सत्यम्, असत्यम्, सत्यम्, असत्यम्
   (C) असत्यम्, सत्यम्, असत्यम्, सत्यम्
   (D) असत्यम्, सत्यम्, सत्यम्, असत्यम्



www.StudentBounty.com

StudentBounty.com



48. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) पुराणं पुरातनवृत्तान्त-कथनरूपमाख्यानम्। (*p*) यास्कः।

(*b*) पुरा नवं भवति। (*q*) राजशेखरः।

(*c*) पुराणमित्येव न साधु सर्वम्। (*r*) कालिदासः।

(*d*) वेदाख्यानोपनिबन्धप्रायं पुराणम्। (*s*) सायणः।

(A) *aq*, *br*, *cs*, *dp*

(B) *as*, *bp*, *cr*, *dq*

(C) *aq*, *bs*, *cr*, *dq*

(D) *ar*, *bs*, *cq*, *dp*

49. ''ऊष्मणश्चोपजायन्ते यच्चाऽन्यत् किञ्चिदीदृशम्।'' मनुस्मृतौ कस्मिन् प्रकरणे श्लोकोऽयं दृश्यते ?

(A) अण्डजवर्णनप्रकरणे

(B) जरायुजवर्णनप्रकरणे

(C) स्वेदजवर्णनप्रकरणे

(D) उद्भिज्जवर्णनप्रकरणे

50. ''अबध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति।
अप्राप्यव्यवहारं च स दाप्यो दममुत्तमम्॥''
याज्ञवल्क्यस्मृतौ अयं श्लोकः कस्मिन् प्रकरणे दृश्यते ?

(A) दण्डपारुष्यप्रकरणे

(B) साहसप्रकरणे

(C) वेतनादानप्रकरणे

(D) स्तेयप्रकरणे

51. 'विमतवाक्यं त्वश्रद्धेयमेव' इति एतद् वाक्यं रसगङ्गाधरे कस्मिन् प्रकरणे वर्तते।

(A) काव्यकारणप्रकरणे

(B) काव्यलक्षणप्रकरणे

(C) काव्यभेदनिरूपणप्रकरणे

(D) रसनिरूपणप्रकरणे

52. काव्यस्य आत्मा कः ?

(A) अभिधार्थः

(B) लक्ष्यार्थः

(C) ध्वनिः

(D) बुद्धिः

53. वक्रोक्तिजीवितस्य कर्ता कः ?

(A) क्षेमेन्द्रः

(B) कुन्तकः

(C) आनन्दवर्धनः

(D) रुद्रटः

54. नाट्ये सौन्दर्यवैशिष्ट्यावगाहिका वृत्तिः का ?

(A) भारती

(B) सात्त्वती

(C) आरभटी

(D) कैशिकी



www.StudentBounty.com

StudentBounty.com



55. कस्य रूपकस्य नायिका द्विधा कुलस्त्री गणिका च ?
   (A) नाटकस्य
   (B) प्रहसनस्य
   (C) प्रकरणस्य
   (D) भाणस्य

56. कति काव्यहेतवः ?
   (A) द्वौ
   (B) त्रयः
   (C) चत्वारः
   (D) पञ्च

57. विश्रुतः कया सह विवाहमकरोत् ?
   (A) कन्दुकवत्या
   (B) मणिकर्णिकया
   (C) सौदामिन्या
   (D) मञ्जुवादिन्या

58. 'निधिः श्रुतीनां धनसम्पदामिव।' कस्येदं वर्णनम् ?
   (A) नारदमुनेः
   (B) श्रीहरेः
   (C) युधिष्ठिरस्य
   (D) अर्जुनस्य

59. 'अमुष्य विद्या रसताग्रवर्तनी।' इति कस्य वर्णनम् ?
   (A) नारदमुनेः
   (B) नलस्य
   (C) भीमस्य
   (D) शिशुपालस्य

60. मुद्राराक्षसस्य प्रथमाङ्कस्य का संज्ञा ?
   (A) राक्षसविचारः
   (B) कृतककलहः
   (C) मुद्रालाभः
   (D) राक्षसनिर्वेदः

61. 'अंशुमयीमिव तनुच्छायानुलिप्तभूतलाम्।' इयं पङ्क्तिः कां वर्णयति ?
   (A) शकुन्तलाम्
   (B) महाश्वेताम्
   (C) कादम्बरीम्
   (D) सीताम्

62. कर्णः कस्मै कवचकुण्डलानि यच्छति ?
   (A) ब्रह्मणे
   (B) सूर्याय
   (C) चन्द्राय
   (D) इन्द्राय



www.StudentBounty.com

StudentBounty.com



63. उत्तररामचरिते कति अङ्का: सन्ति ?

(A) त्रय:

(B) पञ्च

(C) सप्त

(D) नव

64. ''लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभ:।

असत्पुरुषसेवेव दृष्टिर्विफलतां गता।''

अस्मिन् श्लोके क: अलङ्कार: ?

(A) उत्प्रेक्षा

(B) रूपक:

(C) उपमा

(D) दृष्टान्त:

65. ''पातयति महापुरुषान् सममेव बहूननादरेणैव।''

एषा पङ्क्ति: कस्मिन् काव्ये वर्तते ?

(A) दशकुमारचरिते

(B) हर्षचरिते

(C) रघुवंशे

(D) शिशुपालवधे

66. अधस्तनवर्गयो: युग्मपर्यायेषु समीचीनं विचिनुत –

| | | | |
|---|---|---|---|
| (*a*) | मेघ: | (*p*) | महाशनो भवतीति |
| (*b*) | अश्व: | (*q*) | जातानि वैनं विदु: |
| (*c*) | जातवेदा: | (*r*) | अक्नोपनो भवतीति |
| (*d*) | अग्नि: | (*s*) | मेहतीति सत: |

(A) *as*, *bp*, *cp*, *dr*

(B) *as*, *bp*, *cq*, *dr*

(C) *aq*, *bp*, *cr*, *ds*

(D) *as*, *br*, *cq*, *dp*

67. ब्राह्मीलिपे: वाचनम् इदंप्रथमतया केन कृतम् ?

(A) चार्ल्स विल्किन्सन्

(B) जेम्स प्रिन्सेप

(C) कर्नल रॉड

(D) कनिंगहॅम

68. अधस्तनेषु युग्मपर्यायेषु समीचीनं पर्यायं विचिनुत –

| | | | |
|---|---|---|---|
| (*a*) | नासिकगुहाशिलालेख: | (*p*) | यशोधर्मा |
| (*b*) | मन्दसोरस्तम्भलेख: | (*q*) | गुप्तकालीन: |
| (*c*) | आयहोळेशिलालेख: | (*r*) | मौर्योत्तरकालीन: |
| (*d*) | मेहरौलीशिलालेख: | (*s*) | पुलकेशी द्वितीय: |

(A) *as*, *bq*, *cr*, *dp*

(B) *aq*, *bs*, *cp*, *dr*

(C) *ap*, *br*, *cq*, *ds*

(D) *ar*, *bp*, *cs*, *dq*



www.StudentBounty.com

StudentBounty.com



69. पुराभिलेखेषु केषां समावेशो नास्ति ?
   (A) शिलालेखानाम्
   (B) धातुलेखानाम्
   (C) प्रस्तरलेखानाम्
   (D) भूर्जपत्रलेखानाम्

70. खरोष्ठीलिप्यां लिखितः अशोकशिलालेखः कस्मिन् स्थाने वर्तते ?
   (A) कालसी
   (B) मास्की
   (C) गिरनार
   (D) शाहबाझगढी

71. अधस्तनेषु विरूपं विचिनुत –
   (A) शिक्षा
   (B) व्याकरणम्
   (C) पुराणम्
   (D) कल्पः

72. अधस्तनानां वाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत –
   (*a*) साहचर्यनियमः परामर्शः।
   (*b*) आत्मत्वाभिसंबन्धवानात्मा।
   (*c*) एकत्वादिव्यवहारहेतुः परिमाणम्।
   (*d*) रसनेन्द्रियग्राह्यो विशेषगुणो वायुः।
   (A) सत्यम्, असत्यम्, सत्यम्, असत्यम्
   (B) असत्यम्, असत्यम्, सत्यम्, सत्यम्
   (C) असत्यम्, सत्यम्, असत्यम्, असत्यम्
   (D) सत्यम्, असत्यम्, असत्यम्, सत्यम्

73. 'स्वाध्यायान्मा प्रमदः' इति सन्देशः कस्यामुपनिषदि वर्तते ?
   (A) ऐतरेयोपनिषदि
   (B) ईशावास्योपनिषदि
   (C) कठोपनिषदि
   (D) तैत्तिरीयोपनिषदि

74. सर्वार्थसिद्धिः केन वंशेन सम्बद्धः ?
   (A) सूर्यवंशेन
   (B) चन्द्रवंशेन
   (C) गुप्तवंशेन
   (D) नन्दवंशेन

75. ब्रजभाषा कस्याः भाषायाः उपभाषा (dialect) वर्तते ?
   (A) हिन्दी
   (B) गुजराथी
   (C) मराठी
   (D) राजस्थानी



www.StudentBounty.com

StudentBounty.com

**ROUGH WORK**



www.StudentBounty.com